# श्री पराशर संहिता

## अष्टाशीतितमः पटलः

**–: श्रीराम प्रोक्त मुख्य सहस्रनाम स्तोत्रम् :–**

श्री मैत्रेयः ।

श्लो॥ दुःखसङ्घो निवृत्यर्थं - ब्रूहि मे करुणानिधे!
भूयोऽपि कृपया ब्रह्मन् - किञ्चित्साधन मुत्तमम् ॥ १

श्लो॥ ऋषे लोहगिरिं प्राप्तः सीता विरहकातरः
भगवन् किंविधा श्रामः - तत्सर्वं ब्रूहि सत्वरम् ॥ २

वाल्मीकि रुवाच :-

श्लो॥ मायामानुष देहोऽयं - ददर्शाग्रे कपीश्वरम्
हनुमन्तं जगत्स्वामि - बालार्कसम तेजसम् ॥ ३
स सत्वरं समागम्य - साष्टांगं - प्रणिपत्य च
कृताञ्जलि पुटो भूत्वा - हनुमा राममब्रवीत् ॥ ४

श्री हनुमा नुवाच :-

श्लो॥ धन्योऽस्मि कृतकृत्योऽस्मि - दृष्ट्वा त्व त्पादपङ्कजम्
योगिनाम प्यगम्यं च - संसारभय नाशनम्
पुरुषोत्तमं च देवेशं - कर्तव्यं त निवेद्यताम् ॥ ५

श्री रामचन्द्र उवाच :-

श्लो॥ जनस्थानं कपिश्रेष्ठ! - कोऽप्यागत्य विदेहजाम्
हृतवान् विप्रसंवेषो - मारीचानुगते मयि ॥ ६
श्लो॥ गवेष्य साम्प्रतं वीर! - जानकी हरणे क्षमः
त्वया गम्यो न को देश - स्त्वंच ज्ञानवतांवरः
सप्तकोटि महामन्त्र - मन्त्रितावयवः प्रभुः ॥ ७

ऋषयः :-

श्लो॥ को मन्त्रः किञ्च तध्यानं - तन्नो ब्रूहि यथार्थता
कथा सुधारसं पीत्वा - तृप्यामः परंतप ॥ ८

वाल्मीकिः :-

मन्त्रं हनुमतो विद्धि - भुक्तिमुक्ति प्रदायकम्
महारिष्ट महापाप - महादुःख निवारणम् ॥ ९

मन्त्रम् :

ओं ऐं ह्रीं श्रीं हनुमते । रामदूताय । लङ्का विध्वंसनाय । अञ्जनी गर्भ सम्भूताय । शाकिनी डाकिनी विध्वंसनाय । किलिकिलि बु बु कारेण विभीषणाय । हनुमद्देवाय । ओं ह्रीं श्रीं ह्रौं ह्रां ह्रुं फट् स्वाहा ।

श्लो॥ अयं हनुमतो मन्त्रं - सहस्रनाम संज्ञितम्
जानन्तु ऋषय स्सर्वे - महादुरितनाशनम् ॥ १०
यस्य संस्मरणात् सीतां - लब्ध्वा राज्य मकण्टकम्
विभीषणाय च ददौ - यात्मानं लब्धवा न्यथा ॥ ११
सहस्रनाम सन्मन्त्रं - दुःखाद्यौघ निवारणम्
वाल्मीके! ब्रूहि न स्तूर्णं - शुश्रूषामः कथांपराम् ॥ १२

वाल्मीकि रुवाच :-

श्लो॥ शृण्वन्तु ऋषय स्सर्वे - सहस्रनामकं स्तवम्
स्तवानां मुत्तमं दिव्यं - सदर्थस्य प्रदायकम् ॥ १३

च॥ अस्यश्री हनुमत्सहस्रनामस्तोत्र मन्त्रस्य श्रीराम चन्द्र ऋषिः । अनुष्टुप्छन्दः । श्री हनुमान् रुद्रो देवता । ह्रीं श्रीं ह्रुं ह्रां बीजं । श्रीं इति शक्तिः । किलिकिल बु बु कारेण इति कीलकं । लङ्काविध्वंसनेति कवचं । मम सर्वोपद्रव शान्त्यर्थं मम सर्वकार्य सिध्यर्थे जपे विनियोगः ॥ न्यासादिकं विन्यस्य ॥ १४

ओं ऐं हनुमते रामदूताय - अंगुष्ठाभ्यां नमः । लङ्का विध्वंसनाय - तर्जनीभ्यां नमः । अञ्जनीगर्भ सम्भूताय - मध्यमाभ्यां नमः । शाकिनी डाकिनी विध्वंसनाय - अनामिकाभ्यां नमः । किलिकिलि बु बु कारेण विभीषणाय हनुमद्देवाय - कनिष्ठिकाभ्यां नमः । ओं ह्रीं श्रीं ह्रौं ह्रां ह्रुं फट् स्वाहा - करतल करपृष्ठाभ्यां नमः ॥ ओं ऐं हनुमते रामदूताय- हृदयाय नमः । लङ्का विध्वंसनाय - शिरसि स्वाहा । अञ्जनीगर्भ सम्भूताय- शिखायैवषट् । शाकिनी डाकिनी विध्वंसनाय कवचाय हुं । किलिकिलि बु बु कारेण विभीषणाय हनुमद्देवताय - नेत्रत्रयाय वौषट् ।

ओं ह्रीं श्रीं ह्लौं ह्रां ह्रुं फट् स्वाहा - अस्त्राय फट् । भूर्भुव स्सुवरो
मिति दिग्बन्धः :- १५

ध्यानम् :

श्लो॥ प्रतप्त स्वर्णवर्णाभं संरक्तारुण लोचनम्
सुग्रीवादि युतं ध्याये - पीताम्बर समावृतम् ॥ १६
गोष्पदीकृतवारीशं - पुच्छ मस्तक मीश्वरम्
ज्ञानमुद्रां च बिभ्राणं - सर्वालङ्कार भूषितम् ॥ १७

श्रीरामचन्द्र उवाच :-

## श्री हनुमत् सहस्रनाम स्तोत्रम्

श्लो॥ हनुमान् श्रीप्रदो वायु - पुत्रो रुद्रोऽनघोऽजरः
अमृत्यु र्वीरवीर श्च - ग्रामवासो जनाश्रयः ॥ १८
धनदो निर्गुणश्शूरो - वीरो निधिपतिर्मुनिः
पिङ्गाक्षो वरदो वाग्मी - सीताशोक विनाशकः ॥ १९
शिवश्शर्वः परोऽव्यक्तो - व्यक्ताऽव्यक्तो धराधरः
पिङ्गकेशः पिङ्गरोमा - श्रुतिगम्य स्सनातनः ॥ २०
अनादिर्भगवान् देवो - विश्व हेतुर्जनाश्रयः
आरोग्यकर्ता विश्वेशो - विश्वनाथो हरीश्वरः ॥ २१
भर्गो रामो रामभक्तः - कल्याणः प्रकृतिस्थिरः
विश्वम्भरो विश्वमूर्ति - र्विश्वाकारश्च विश्वपः ॥ २२
विश्वात्मा विश्वसेव्योथ - विश्वो विश्वहरो रविः
विश्वचेष्टो विश्वगम्यो - विश्वध्येयः कलाधरः ॥ २३
प्लवङ्गमः कपिश्रेष्ठो - ज्येष्ठो विद्या वनेचरः
बालो वृद्धोयुवा तत्वं - तत्वगम्य स्सुखोह्यजः ॥ २४
अञ्जनासूनु रव्यग्रो : ग्रामख्यातो धराधरः
भूर्भुवस्स्व र्महर्लोको - जनोलोक स्तपोऽव्ययः ॥ २५

सत्यमोङ्कारगम्यश्च - प्रणवो व्यापकोऽमलः
शिवोधर्मप्रतिष्ठाता - रामेष्टः फल्गुनप्रियः ॥ २६
गोष्पदीकृत वाराशिः - पूर्णकामो धरापतिः
रक्षोघ्नः पुण्डरीकाक्ष श्शरणागत वत्सलः ॥ २७
जानकी प्राणदाता च - रक्षः प्राणापहारकः
पूर्णसत्वः पीतवासा - दिवाकर समप्रभः ॥ २८
द्रोणहर्ता शक्तिनेता - शक्ति राक्षस मारकः
रक्षोघ्नो रामदूत श्च शाकिनी जीवहारकः ॥ २९
भुभुक्कारहताराति - गर्वः पर्वतभेदनः
हेतुमान् प्रांशुबीजं च - विश्वभर्ता जगद्गुरुः ॥ ३०
जगत्त्राता जगन्नाथो - जगदीशो जनेश्वरः
जगत्पिता हरिश्श्रीशो - गरुडस्मयभञ्जनः ॥ ३१
पार्थध्वजो वायुपुत्रोऽमित पुच्छोऽमितप्रभः
ब्रह्मपुच्छः परब्रह्म - पुच्छो रामेष्ट एवच ॥ ३२
सुग्रीवादियुतो ज्ञानी - वानरो वानरेश्वरः
कल्पस्थायी चिरञ्जीवी - प्रसन्न श्च सदाशिवः ॥ ३३
सन्मति स्सद्गति र्भुक्ति - मुक्तिदः कीर्तिदायकः
कीर्तिः कीर्तिप्रदश्चैव - समुद्र श्श्रीप्रद श्शिवः ॥ ३४
उदधिक्रमणो देव - स्संसार भयनाशनः
वालिबन्धनकृ द्विश्व - जेता विश्वप्रतिष्ठितः ॥ ३५
लङ्कारिः कालपुरुषो - लङ्केश गृहभञ्जनः
भूतावासो वासुदेवो - वसुस्त्रिभुवनेश्वरः ॥ ३६
श्रीरामदूतः कृष्ण श्च - लङ्काप्रासाद भञ्जनः
कृष्णः कृष्णस्तुत श्शान्त - श्शान्तिदो विश्वपावनः ॥ ३७
विश्वभोक्ता च मारीघ्नो - ब्रह्मचारी जितेन्द्रियः
ऊर्ध्वगोलाङ्गुलीमाली - लाङ्गूल हतराक्षसः ॥ ३८

समीर तनुजो वीरो - वीरमारो जयप्रदः
जगन्मङ्गलदः पुण्यः - पुण्य श्रवण कीर्तनः ॥ ३९
पुण्यकीर्तिः पुण्यगतिः - जगत्पावन पावनः
देवेशो जितरोध श्च रामभक्ति विधायकः ॥ ४०
ध्याता ध्येयो भगस्साक्षी - चेतश्चैतन्य विग्रहः
ज्ञानदः प्राणदः प्राणो - जगत्प्राण स्समीरणः ॥ ४१
विभीषण प्रियश्शूरः - पिप्पलाश्रय सिद्धिदः
सुहृत्सिद्धाश्रयः कालः - कालभक्षक भञ्जितः ॥ ४२
लङ्केश निधनस्स्थायी - लङ्का दाहक ईश्वरः
चन्द्रसूर्याग्नि नेत्रश्च - कालाग्निः प्रलयान्तकः ॥ ४३
कपिलः कपीशः पुण्य - राशि र्द्वादशराशिगः
सर्वाश्रयोऽप्रमेयात्मा - रेवत्यादि निवारकः ॥ ४४
लक्ष्मण प्राण दाता च - सीताजीवन हेतुकः
रामध्येयो हृषीकेशो - विष्णुभक्तो जटी बली ॥ ४५
देवारिदर्पहा होता - कर्ताहर्ता जगत्प्रभुः
नगर ग्रामपालश्च - शुद्धो बुद्धो निरन्तरः ॥ ४६
निरञ्जनो निर्विकल्पो - गुणातीतो भयङ्करः
हनुमांश्च दुराराध्य स्तपस्साध्योऽमरेश्वरः ॥ ४७
जानकी घन शोकोत्थ - तापहर्ता परात्परः
वाङ्मयस्सदसद्रूप - कारणं प्रकृतेः परः ॥ ४८
भाग्यदो निर्मलो नेता - पुच्छलङ्काविदाहकः
पुच्छबद्धो यातुधानो - यातुधानरिपुप्रिय ॥ ४९
छायापहारी भूतेशो - लोकेश स्सद्गतिप्रदः
प्लवङ्गमेश्वरः क्रोधः - क्रोधः संरक्तलोचनः ५०
क्रोधहर्ता तापहर्ता - भक्ताभयवर प्रदः

भक्तानुकम्पी विश्वेशः - पुरुहूतः पुरन्दरः ॥ ५१
अग्निर्विभावसुर्भास्वान् - यमो निरृतिरेवच
वरुणो वायुगतिमान् - वायुः कौबेर ईश्वरः ॥ ५२
रविश्चन्द्रः कुजस्सौम्यो - गुरुः काव्यः शनैश्वरः
राहुः केतुर्मरुद्धोता - धाता हर्ता समीरकः ॥ ५३
मशकीकृतदेवारिः - दैत्यारि र्मधुसूदनः
कामः कपिः कामपालः - कपिलो विश्वजीवनः ॥ ५४
भागीरथी पदाम्भोज स्सेतुबन्ध विशारदः
स्वाहा स्वधा हविः कव्यं - हव्य कव्य प्रकाशकः ॥ ५५
स्वप्रकाशो महावीरो - लघुश्चामित विक्रमः
प्रडीनोड्डीनगतिमान् - सद्गतिः पुरुषोत्तमः ॥ ५६
जगदात्मा जगद्योनि - र्जगदन्तो ह्यनन्तकः
विपाप्मा निष्कलङ्कश्च - महान् महदहंकृतिः ॥ ५७
खं वायुः पृथिवी - ह्यापो वह्निर्दिक्काल एवच,
क्षेत्रज्ञः क्षेत्रपालश्च - पल्वली कुलसागरः ॥ ५८
हिरण्मयः पुराणश्च - खेचरो भूचरोमनुः
हिरण्यगर्भस्सूत्रात्मा - राजराजो विशांपतिः ॥ ५९
वेदान्तवेद्योद्गीथश्च - वेदवेदाङ्ग पारगः
प्रतिग्रामस्थितः स्साध्य - स्स्फूर्तिदाता गुणाकरः ॥ ६०
नक्षत्रमाली भूतात्मा - सुरभिः कल्पपादपः
चिन्तामणि र्गुणनिधिः - प्रजापतिरनुत्तमः ॥ ६१
पुण्यश्लोकः पुराराति - र्ज्योतिष्मान् शार्वरीपतिः
किलिकिल्यारवत्रस्त - भूत प्रेत पिशाचकः ॥ ६२
ऋणत्रय हरस्सूक्ष्म - स्स्थूल स्सर्वगतः पुमान्
अपस्मार हरस्स्मर्ता - श्रुतिर्गाथास्मृतिर्मनुः ॥ ६३
स्वर्गद्वारः प्रजाद्वारो - मोक्षद्वार कपीश्वरः
नादरूपः परब्रह्म - ब्रह्मब्रह्म पुरातनः ॥ ६४

एकोनैको जनश्शुक्ल - स्स्वयं ज्योति रनाकुलः
ज्योति ज्योतिरनादिश्च - सात्विको राजसत्तमः ॥ ६५

तमोहर्ता निरालम्बो - निराकारो गुणाकरः
गुणाश्रयो गुणमयो - बृहत्कायो बृहद्यशाः ॥ ६६

बृहद्धनु र्बृहत्पादो - बृहन्मूर्धा बृहत्स्वनः
बृहत्कर्णो बृहच्छ्वासो - बृह न्नेत्रो बृहद्गलः ॥ ६७

बृहद्यत्नो बृहच्चेष्टो - बृहत्पुच्छो बृहत्करः
बृहद्गति र्बृ हल्लोभ्यो - बृहल्लोक फलप्रदः ॥ ६८

बृहच्छक्ति र्बृ हद्वाञ्छा - फलदो बृहदीश्वरः
बृहल्लोकनुतो द्रष्टा - विद्यादाता जगद्गुरुः ॥ ६९

देवाचार्यस्सत्यवादी - ब्रह्मवादी कलाधरः
सप्तपातालगामीच - मलयाचल संश्रयः ॥ ७०

उत्तराशास्थितश्श्रीदो - दिव्यौषधवशङ्करः
शाखामृगः कपीन्द्रश्च - पुराण श्श्रुति सञ्चरः ॥ ७१

चतुरो ब्राह्मणो योगी - योगगम्यः परात्परः
अनादि निधनो व्यासो - वैकुण्ठः पृथिवीपतिः ॥ ७२

पराजितो जितारातिः - स्सदानन्दश्च ईशिता
गोपालो गोपति र्गोप्ता - कलिः कालः परात्परः ॥ ७३

मनोवेगी सदायोगी - संसारभय नाशनः
तत्त्वदाताच तत्त्वज्ञ - स्तत्त्व तत्त्व प्रकाशकः ॥ ७४

शुद्धो बुद्धो नित्यमुक्तो - युक्ताकारो जयप्रदः
प्रलयोऽमितमायश्च - मायातीतो विमत्सरः ॥ ७५

मायानिर्जितरक्षश्च - मायानिर्मित विष्टपः
मायाश्रयश्च निर्लेपो - मायानिर्वञ्चकस्सुखः ॥ ७६

सुखी सुखप्रदो नागो - महेशकृत संस्तवः
महेश्वरस्सत्य सन्ध - श्शरभः कलिपावनः ॥ ७७

रसो रसज्ञस्सम्मानस्तपश्च क्षुश्च भैरवः
घ्राणो गन्धस्स्पर्शनं च - स्पर्शोऽहङ्कारमानदः ॥ ७८

नेतिनेतीति गम्यश्च वैकुण्ठ भजनप्रियः
गिरीशो गिरिजा कान्तो - दुर्वासाः कविरङ्गिराः ॥ ७९

भृगुर्वसिष्ठश्च्यवन - स्तुम्बुरुर्नारदोऽमलः
विश्वक्षेत्रं विश्वबीजं - विश्वनेत्रश्च विश्वपः ॥ ८०

याजको यजमानश्च - पावकः पितरस्तथा
श्रद्धाबुद्धि क्षमा तन्द्रा - मन्त्रो मन्त्रयुत स्स्वरः ॥ ८१

राजेन्द्रो भूपतिः कण्ठमाली संसारसारथिः
नित्यस्संपूर्ण कामश्च - भक्त कामधुगुत्तमः ॥ ८२

गुणपः कीशपो भ्राता - पिता माता च मारुतिः
सहस्रशीर्षा पुरुषः - सहस्राक्षस्सहस्रपात् ॥ ८३

कामजित्कामदहनः - कामः काम्यफलप्रदः
मुद्राहारी च रक्षोघ्नः - क्षिति भारहरो बलः ॥ ८४

नखदंष्ट्रायुधो विष्णु - र्भक्तोऽभयवरप्रदः
दर्पहा दर्पदोदृप्त - श्शतमूर्ति रमूर्तिमान् ॥ ८५

महानिधि र्महा भागो - महाभोगो महार्थदः
महाकारो महायोगी - महातेजा महाद्युतिः ॥ ८६

महाकर्मा महानादो - महामन्त्रो महामतिः
महाशयो महोदारो - महादेवात्मको विभुः ॥ ८७

रुद्रकर्मा क्रूरकर्मा - रत्ननाभः कृतागमः
अम्भोधिलङ्घन सिंहो - नित्यो धर्म प्रमोदनः ॥ ८८

जितामित्रो जयस्सामो - विजयो वायुवाहनः
जीव दाता सहस्रांशु - र्मुकुन्दो भूरिदक्षिणः ॥ ८९

सिद्धार्थ सिसिद्धिद स्सिद्ध - संकल्प सिद्धिहेतुक
सप्तपाताल चरण - स्सप्तर्षि गणवन्दितः ॥ ९०

सप्ताब्धिलङ्घनो वीर - स्सप्तद्वीपोरुमण्डलः
सप्ताङ्गराज्य सुखद - स्सप्तमातृनिषेवितः ॥ ९१
सप्तलोकैक मकुट - स्सप्त होता स्वराश्रयः
सप्तच्छन्दोनिधि स्सप्त - च्छन्द स्सप्तजनाश्रयः ॥ ९२
सप्तसामोप गीतश्च - सप्तपाताल संश्रयः
मेधावी कीर्तिद श्शोकहारी दौर्भाग्य नाशनः ॥ ९३
सर्ववश्यकरो भर्गो - दोषघ्नः पुत्रपौत्रदः
प्रतिवादि मुखस्तम्भो - दुष्ट चित्तप्रसादनः ॥ ९४
पराभिचारशमनो - दुःखघ्नो बन्धमोक्षदः
नवद्वार पुराधारो - नवद्वार निकेतनः ॥ ९५
नरनारायण स्तुत्यो - नरनाथो महेश्वरः
मेखली कवची खड्गी - भ्राजिष्णु र्विष्णु सारथिः ॥ ९६
बहुयोजन विस्तीर्ण - पुच्छः पुच्छहतासुरः
दुष्टग्रह निहन्ता च पिशाच ग्रह घातुकः ॥ ९७
बालग्रह विनाशी च - धर्मोनेता कृपाकरः
उग्रकृत्योग्रवेगश्च - उग्रनेत्र श्शतक्रतुः ॥ ९८
शतमन्यु स्तुत स्तुत्य - स्स्तुति स्स्तोता महाबलः
समग्रगुणशाली च - व्यग्रोरक्षो विनाशकः ॥ ९९
रक्षोघ्न हस्तो ब्रह्मेश - श्श्रीधरो भक्तवत्सलः
मेघनादो मेघरूपो - मेघवृष्टि निवारकः ॥ १००
मेघ जीवन हेतुश्च - मेघश्यामः परात्मकः
समीर तनयो बोद्धा - तत्वविद्या विशारदः ॥ १०१
अमोघोऽमोघवृष्टिश्च - इष्टदोऽनिष्टनाशकः
अर्थोऽनर्थापहारी च - समर्थो राम सेवकः ॥ १०२
अर्थी धन्य स्सुरारातिः - पुण्डरीकाक्ष आत्मभूः
सङ्कर्षणो विशुद्धात्मा - विद्याराशि स्सुरेश्वरः ॥ १०३

अचलोद्धारको नित्य - स्सेतुकृद्रामसारथिः
आनन्द परमानन्दो - मत्स्यः कूर्मो निधिश्शयः ॥ १०४
वराहो नारसिंहश्च - वामनो जमदग्निजः
रामः कृष्ण शिवो बुद्धः - कल्की रामाश्रयो हरः ॥ १०५
नन्दी भृङ्गी च चण्डी च - गणेशो गणसेवितः
कर्माध्यक्ष स्सुराध्यक्षो - विश्रामो जगतां पतिः ॥ १०६
जगन्नाथः कपिश्रेष्ठ - स्सर्वावास स्सदाश्रयः
सुग्रीवादि स्तुतश्शान्त - स्सर्वकर्मा प्लवङ्गमः ॥ १०७
नखदारित रक्षश्च - नखायुध विशारदः
कुशल स्सुघन श्शेषो - वासुकि स्तक्षक स्स्वरः ॥ १०८
स्वर्णवर्णो बलाढ्यश्च - रामपूज्योऽघनाशनः
कैवल्यदीपः कैवल्यो - गरुडः पन्नगो गुरुः ॥ १०९
किल्याराबहुतारातिः - गर्वः पर्वतभेदनः
वज्राङ्गो वज्रवेगश्च - भक्तो वज्र निवारकः ॥ ११०
नखायुधो मणिग्रीवो - ज्वालामाली च भास्करः
प्रौढ प्रताप स्तपनो - भक्ततापनिवारकः ॥ १११
शरणं जीवनं भोक्ता - नानाचेष्टो ह्यचञ्चलः
सुस्वस्थोऽष्टास्यहा - दुःखशमनः पवनात्मजः ॥ ११२
पावनः पवनः कान्तो - भक्तागस्सहनोबलः
मेघनाद रिपुर्मेघ - नादसंहृत राक्षसः ॥ ११३
क्षरोऽक्षरो विनीतात्मा - वानरेशस्सतांगतिः
श्रीकण्ठश्शितिकण्ठश्च - सहायस्सहनायकः ॥ ११४
अस्थूलस्त्वनणुर्भर्गो - देवस्संसृति नाशनः
अध्यात्म विद्यासारश्च - अध्यात्म कुशलस्सुधीः ॥ ११५
अकल्मष स्सत्यहेतु - स्सत्यगस्सत्य गोचरः
सत्यगर्भ स्सत्यरूप - स्सत्यः सत्य पराक्रमः ॥ ११६

अञ्जना प्राणलिङ्गश्च - वायुवंशोद्भव स्सुधीः
भद्ररूपो रुद्ररूप - स्सुरूप श्चित्ररूपधृत् ॥ ११७
मैनाकवन्दित सूक्ष्म दर्शनो विजयो जयः
क्रान्त दिङ्मण्डलो रुद्रः - प्रकटीकृत विक्रमः ॥ ११८
कम्बुकण्ठः प्रसन्नात्मा - ह्रस्वनासो वृकोदरः
लम्बोष्ठः कुण्डली चित्रमाली योगविदां वरः ॥ ११९
विपश्चित्कविरानन्द विग्रहोऽनन्य शासनः
फल्गुनीसूनु रव्यग्रो - योगात्मा योग तत्परः ॥ १२०
योगवेद्यो योगकर्ता - योगयोनिर्दिगम्बरः
अकारादि क्षकारांत - वर्ण निर्मित विग्रहः ॥ १२१
उलूखल मुखस्सिंह - स्संस्तुतः परमेश्वरः
श्लिष्टजङ्घ श्लिष्टजानु - श्लिष्टपाणि श्शिखाधरः ॥ १२२
सुशर्माऽमितशर्मा च नारायण परायणः
जिष्णुर्भविष्णू रोचिष्णु - र्ग्रसिष्णु स्स्थाणु रेवच । १२३
हरिरुद्रानुकृद्वृक्षकम्पनो भूमि कम्पनः
गुणप्रवाहसूत्रात्मा - वीतरागस्तुति प्रियः ॥ १२४
नागकन्या भयध्वंसी - रुक्मवर्णः कपालभृत्
अनाकुलो भवोपायोऽनपायो वेदपारगः ॥ १२५
अक्षरः पुरुषो लोक नाथो रक्षः प्रभुर्दृढः
अष्टाङ्गयोग फलभुक् सत्य सन्धः पुरुष्टुतः ॥ १२६
श्मशानस्थान निलयः प्रेत विद्रावणक्षमः
पञ्चाक्षर परः पञ्च मातृको रञ्जन ध्वजः ॥ १२७
योगिनी बृन्द वन्द्यश्च - शत्रुघ्नोऽनन्त विक्रमः
ब्रह्मचारीन्द्रिय रिपु र्धृतदण्डो दशात्मकः ॥ १२८
अप्रपञ्च स्सदाचार - श्शूरसेन विदारकः
वृद्धप्रमोदश्चानन्द - स्सप्त जिह्वापतिर्धरः ॥ १२९

नवद्वार पुराधारः - प्रत्यगस्साम गायकः
षट्चक्रधामा स्वर्लोको - भयहृन्मानदोऽमदः ॥ १३०
सर्व वश्यकरश्शक्ति - र्नेताचानन्त मङ्गलः
अष्टमूर्ति र्धरोनेता - विरूपस्स्वर सुन्दरः ॥ १३१
धूमकेतु र्महाकेतु - स्सत्यकेतु र्महारथः
नन्दिप्रियः स्वतन्त्रश्च - मेखली समर प्रियः ॥ १३२
लोहाङ्गः सर्वविद्धन्वी - षट्कलश्शर्व ईश्वरः
फलभुक्फलहस्तश्च - सर्वकर्म फलप्रदः ॥ १३३
धर्माध्यक्षो धर्मफलो - धर्मोधर्म प्रदोऽर्थदः
पञ्चविंशति तत्वज्ञ - स्तारक ब्रह्मतत्परः ॥ १३४
त्रिमार्गवसतिर्भीमः - सर्वदुःखनिबर्हणः
ऊर्जस्वान् निर्गलश्शूली - माली गर्भोनिशाचरः ॥ १३५
रक्ताम्बरधरो रक्तो - रक्तमाला विभूषणः
वनमाली शुभाङ्गश्च - श्वेतः श्वेताम्बरो युवा ॥ १३६
जयो जयपरीवारः - सहस्रवदनः कविः
शाकिनी डाकिनी यक्ष रक्षो भूतौघ भञ्जनः ॥ १३७
सद्योजातः कामगति - र्ज्ञानमूर्ति र्यशस्करः
शम्भुतेजाः सार्वभौमो - विष्णुभक्तः प्लवङ्गमः ॥ १३८
चतुर्नवति मन्त्रज्ञः - पौलस्त्य बलदर्पहा
सर्वलक्ष्मी प्रदश्श्रीमानङ्गद प्रिय ईडितः ॥ १३९
स्मृतिर्बीजं सुरेशानः - संसार भय नाशनः
उत्तमश्श्रीपरीवार - श्श्रीभूर्दुर्गा च कामदृक् ॥ १४०
सदागतिर्मातरिश्वा - रामपादाब्ज षट्पदः
नीलप्रियो नीलवर्णो - नीलवर्ण प्रियस्सुहृत् ॥ १४१
रामदूतो लोकबन्धु - रन्तरात्मा मनोरमः
श्रीराम ध्यानकृद्वीर - स्सदाकिंपुरुषस्तुतः ॥ १४२

रामकार्यातिरक्तश्च - शुद्धिर्गति रतामयः
पुण्यश्लोकः परानन्दः - परेशः प्रियसारथिः ॥ १४२
लोकस्वामी मुक्तिदाता - सर्वकारण कारणः
महाबलो महावीरः - पारावार गतिर्गुरुः ॥ १४३
समस्त लोकसाक्षी च - समस्त सुरवन्दितः
सीतासमेत श्रीराम पाद सेवाधुरन्धरः ॥ १४४

श्री सीतासमेत श्रीरामपाद सेवाधुरन्धरः
श्री आञ्जनेय सहस्रनामश्लोका स्समाप्ताः

वाल्मीकि रुवाच :-

श्लो॥ इति नाम्नां सहस्रेण - स्तुतो रामेण वायुभूः
उवाच तं प्रसन्नात्मा - सन्दा यात्मान मव्ययम् ॥ १४५

श्री हनुमा नुवाच :-

श्लो॥ ध्यानास्पद मिदं ब्रह्म - मत्पुर स्समुपस्थितम्
स्वामिन् कृपानिधे! राम! - ज्ञातोऽसि कपिना मया ॥ १४६
त्वद्ध्यान निरता लोकाः - किं मां जपसि सादरम्
त आगमनहेतुश्च - ज्ञातो ह्यत्र मयानघ ॥ १४७
कर्तव्यं मम किं राम - तथा ब्रूहि च राघव
इति प्रबोदितो रामः - प्रहृष्टा त्मेद मब्रवीत् ॥ १४८

श्री रामः :-

श्लो॥ दुर्जयः खलु वैदेहीं - गृहीत्वा कोऽपि निर्गतः
हत्वा तं निर्घृणं वीर! - आनयस्व कपीश्वर ॥ १४९
मम दास्यं कुरु सखे! - भद्र! विश्वसुखकर!
तथाकृते त्वया वीर! - मम कार्यं भविष्यति ॥ १५०

ओ मित्याज्ञां तु शिरसा - गृहीत्वा च कपीश्वरः
विधेयं विधिवत्तत्र - चकार स शिव स्स्वयम् ॥ १५१
इदं नाम्नां सहस्रं तु - योऽधीते प्रत्यहं नरः
दुःखौघो नश्यते तस्य - सम्पत्ति र्वर्धते चिरम् ॥ १५२
वश्यं चतुर्विधं तस्य - भवत्येव न संशयः
राजानो राजपुत्रा श्च - राजकार्या श्च मन्त्रिणः
त्रिकालपठना दस्य - दृश्यन्तेऽत्र त्रिपक्षतः ॥ १५३
अश्वत्थमूले जपतां - नास्ति वैरिकृतं भयम्
त्रिकाल पठनात्तस्य - सिद्धि स्स्या त्करसंस्थिता ॥ १५४
ब्राह्मीमुहूर्तें चोत्थाय - प्रत्यहं यश्च पठे न्नरः
ऐहिकामुष्मिकं सोऽपि - लभते नात्र संशयः ॥ १५५
संग्रामे सन्निविष्टानां - वैरिविद्रावणं परम्
ज्वरापस्मार शमनं - गुल्मादीनां निवारणम् ॥ १५६
साम्राज्य सुख सम्पत्ति - दायकं जपतां शृणु
स्वर्गं मोक्षं समाप्नोति - रामचन्द्र प्रसादतः ॥ १५७
य इदं पठते नित्यं - श्रावये द्वा समाहितः
सर्वा न्कामा नवाप्नोति - वायुपुत्र प्रसादतः ॥ १५८

इति श्री पराशर संहितायां श्री पराशर मैत्रेय संवादे
श्री रामप्रोक्त मुख्य सहस्रनाम स्तोत्रं नाम
अष्टाशीतितमः पटलः

# श्री पराशर संहिता

## एकोननवतितमः पटलः

अनुपलब्धः